नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

No. of Questions – **30**

No. of Printed Pages – **8**

# SS-12- Sanskrit Sah. (Supp.)

## संस्कृत साहित्यम्

### उच्च माध्यमिक पूरक परीक्षा, 2020

**समय : 3¼ (सपाद होरात्रयम्)**

**पूर्णाङ्क : 80**

परीक्षार्थिभ्यः सामान्य निर्देशाः

(1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रोपरि नामांक अनिवार्यतः लेख्यः ।

(2) सर्वे प्रश्नाः अनिवार्याः ।

(3) प्रत्येकं प्रश्नस्योत्तरम् उत्तरपुस्तिकायामेव देयम् ।

(4) प्रत्येकं प्रश्नभागस्य उत्तरं क्रमानुसारमेकत्रैव लेखितव्यम् ।

1. अधोलिखितं पद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

धूमज्योतिः सलिलमरुतां सन्निपातः क्व मेघः,
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे,
कामार्ताः हि प्रकृतिकृपणाश्चेतनाऽचेतनेषु ।।

(क) धूमज्योतिः सलिलमरुतां सन्निपातः कः ? (एकपदेन उत्तरम्) **(1)**

(ख) चेतनाऽचेतनेषु के प्रकृतिकृपणाः भवन्ति ? (पूर्णवाक्येन उत्तरम्) **(1)**

(ग) 'यक्षः' इत्यस्य पर्यायपदं पद्यांशात् चित्वा लिखत । **(1)**

(घ) 'गुह्यकस्तं ययाचे' इत्यत्र ययाचे क्रियायाः कर्ता कः ? **(1)**

2. अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

एकस्मिन् दिने इन्दुमती भर्तारं त्रिलोचनम् उपायं दर्शितवती, यद् अधुना वृद्धाश्रमे एव मातरं प्रापय्य निश्चिन्ततायाः अनुभवः क्रियेत् । अनेन तत्र स्वसमवयस्काभिः सह माता अपि सुखिनी स्थास्यति, वयम् अपि इह दुःखोन्मुक्ताः भविष्यामः । त्रिलोचनः इन्दुमत्याः प्रस्तावेन तत्कालम् एव सहमतः अजायत । अवसरं दृष्ट्वा सः मातरं तदर्थम् अनुकूलाम् अपि कृतवान् ।

(क) त्रिलोचनं का उपायं दर्शितवती ? (एकपदेन उत्तरम्) **(1)**

(ख) त्रिलोचनः केन सहमतः अजायत ? (पूर्णवाक्येन उत्तरम्) **(1)**

(ग) 'प्रतिकूलाम्' इत्यस्य विलोमपदं गद्यांशात् चित्वा लिखत । **(1)**

(घ) 'माता अपि सुखिनी स्थास्यति' इत्यत्र क्रियापदं चित्वा लिखत । **(1)**

3. अधोलिखितं नाट्यांशं पठित्वा प्रश्नानाम् उत्तराणि लिखत –

चारुदत्तः – सर्वकालमित्रं मैत्रेयः प्राप्तः । सखे स्वागत । आस्यताम् ।

विदूषकः – यद् भवानाज्ञापयति भो वयस्य एष ते प्रियवयस्येन जूर्णवृद्धेन जातीकुसुमवासितः प्रावारकोऽनुप्रेषितः । सिद्धिकृतदेवकार्यस्यार्यचारुदत्तस्य त्वयोपनेतव्य इति (समर्पयति) (चारुदत्तो गृहीत्वा सचिन्तः स्थितः)

(क) सर्वकालमित्रं कः अस्ति ? (एकपदेन उत्तरम्) **(1)**

(ख) प्रावारकः केन अनुप्रेषितः ? (पूर्णवाक्येन उत्तरम्) **(1)**

(ग) 'जातीकुसुमवासितः प्रावारकः' इत्यत्र विशेष्यपदं किम् ? **(1)**

(घ) 'प्रियवयस्येन जूर्णवृद्धेन' इत्यत्र विशेषणपदं किम् ? **(1)**

4. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – **(3 × 1 = 3)**

(क) गते व्याघ्रे तत्र कश्चिद् द्वीपी समायातः ।

(ख) माघस्य काव्ये त्रयो गुणाः सन्ति ।

(ग) वस्तुतः गुरोः ज्ञानम् अमूल्यं भवति ।

5. निम्नलिखितवाक्ययोः भावार्थः हिन्दीभाषया संस्कृतेन वा लिखत – **(2 × 2 = 4)**

(क) यत्र नार्यस्तु पूज्यन्ते रमन्ते तत्र देवताः ।

(ख) शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः ।

6. अधोलिखितस्य श्लोकस्य अन्वयसहितं सरलम् अर्थं हिन्द्यां संस्कृते वा लिखत – **(1½ + 1½ = 3)**

अभिवादनशीलस्य, नित्यं वृद्धोपसेविनः ।
चत्वारि तस्य वर्द्धन्ते, आयुर्विद्या यशोबलम् ।।

7. निम्नलिखितशब्दयोः हिन्दीभाषायाम् आङ्लभाषायां वा अर्थं लिखत – **(1 + 1 = 2)**

(क) कुशीलवाः

(ख) कामये

8. 'सः यत्प्रमाणं कुरुते ।' इत्यत्र 'कुरुते' इति क्रियायाः कर्ता कः ? **(1)**

9. नन्दिनीप्रसादात् रघोः उदारशीलस्य पुत्रस्य जन्म अभवत् । इत्यत्र 'पुत्रस्य' इति पदस्य विशेषणपदं किम् ? **(1)**

10. 'सुदक्षिणा तस्य सहधर्मचारिणी चासीत् ।' इत्यस्य 'तस्य' सर्वनामस्थाने संज्ञापदस्य प्रयोगं कुरुत । **(1)**

11. "भो भागिनेय ! देहि मे प्राणदक्षिणाम् ।" इति वाक्यं कः कस्मै कथयति ? **(1)**

12. 'भो वयस्य ! अलं सन्तापितेन ।' इत्यत्र रेखाङ्कितपदस्य विलोमपदं लिखत । **(1)**

13. 'भवादृशा एव भवन्ति भाजनान्युपदेशानाम् ।' इत्यत्र 'भवादृशा' इति कर्तृपदस्य क्रियापदं लिखत । **(1)**

14. कति वेदाः ? कस्यचिदेकस्य संक्षिप्तं परिचयं लिखत । **(1 + 2 = 3)**

15. 'विक्रमोर्वशीयम्' नाटकस्य रचयिता कः ? कति अङ्केषु विभक्तमिदं नाटकम् ? **(1 + 1 = 2)**

16. संस्कृतसाहित्यस्य प्रथमः उपन्यासः कः ? एतस्य प्रधानरसस्य नाम लिखत । **(1 + 1 = 2)**

17. निम्नलिखितप्रश्नानां संक्षिप्तम् उत्तरं लिखत – **(3 × 1 = 3)**

(क) 'मानवंश' महाकाव्यस्य रचनाकारः कः अस्ति ?

(ख) 'ईश्वरविलासः' महाकाव्ये केषाम् इतिहासस्य वर्णनम् अस्ति ?

(ग) सोवियतभूमिनेहरूपुरस्कारेण कः कविः सम्मानितः ?

18. अधोलिखितेषु कस्यापि एकस्य छन्दसः लक्षणोदाहरणे लिखत – **(3)**

(क) इन्द्रवज्रा

(ख) भुजङ्गप्रयातम्

(ग) शार्दूलविक्रीडितम्

19. अधोलिखितयोः पद्यांशयोः कस्यचिदेकस्य गणचिह्नं प्रदर्शयन् छन्दसः नामोल्लेखं कुरुत – **(1 + 1 = 2)**

(क) कुपुत्रो जायेत क्वचिदपि कुमाता न भवति ।

(ख) शिरसि मा लिख मा लिख मा लिख ।

20. अधोलिखितेषु कस्यचिदेकस्य अलङ्कारस्य लक्षणोदाहरणे लिखत – **(3)**

(क) अनुप्रासः

(ख) उपमा

(ग) अर्थान्तरन्यासः

21. अधोलिखितयोः पद्यांशयोः प्रयुक्तकस्यचिदेकस्य अलङ्कारस्य नामोल्लेखपूर्वकं लक्षणं लिखत –

**(1 + 1 = 2)**

(क) "उच्छलद् भूरि कीलालः शुशुभे वाहिनीपतिः ।"

(ख) 'संसार–विषवृक्षस्य द्वे एव रसवत्फले ।'

22. अधोलिखितम् अपठितं गद्यांशं पठित्वा प्रश्नानामुत्तराणि लिखत –

कश्चिद् मुनिः गङ्गातीरे तपः आचरति स्म । तस्य मनसि कश्चन विचारः आसीत् – 'वेदाध्ययनं नाम अतीवकष्टकरं भवति । अध्ययनं विनैव वेदज्ञानं सिद्ध्येत् । तदर्थं तपः करोमि ।' इति विचार्य सः तपः कर्तुं प्रवृत्तः । बहुकालः व्यतीतः तथापि सः वेदविद्वान् नाभवत् ।

(क) मुनिः कुत्र तपः आचरति स्म ? (एकपदेन उत्तरम्) **(1)**

(ख) अतीवकष्टकरं किं भवति ? (पूर्णवाक्येन उत्तरम्) **(1)**

(ग) 'सः तपः कर्तुं प्रवृत्तः ।' इत्यत्र 'सः' सर्वनामपदे संज्ञापदं किम् ? **(1)**

23. अधोलिखितं अपठितं गद्यांशं पठित्वा निर्देशानुसारं प्रश्नानामुत्तराणि लिखत –

शिववीरः पत्रमध्ये लिखितां निखिलां योजनां ज्ञात्वा स्वयमेव व्याजेन अफजलखानं हन्तुं चिन्तितवान् । द्वितीये दिवसे अफजलखानः शिवराजं मेलितुं गच्छति । शिववीरोऽपि वस्त्रयोः कवचं करयोश्च तीक्ष्णं व्याघ्रनखं परिधाय तत्स्वागतार्थं गच्छति । शिववीरः परस्परं आलिङ्गनावसरे एव अफजलखानस्य स्कन्धौ ग्रीवाञ्च पाटयित्वा तं धरायां न्यपातयत् । पूर्वयोजनानुसारेण अफजलखानस्य शिबिराणि सेनया दग्धानि, यवनसैनिकाश्च पलायिताः ।

अथ गौरसिंहः स्ववृत्तं श्रावयन्नकथयत् यत् ते गौरसिंहः, श्यामसिंहः सौवर्णी च उदयपुरराज्यस्य लघुक्षेत्रस्य प्रशासकस्य खड्गसिंहस्य सन्ततयः सन्ति । दुर्दैवाद् दिवङ्गतयोः पित्रोः ते त्रयोऽपि देवशर्मणः पुरोहितस्य संरक्षणे न्यवसन् ।

(क) शिववीरः कं हन्तुं चिन्तितवान् ? (एकपदेन उत्तरम्) **(1)**

(ख) गद्यांशे स्ववृत्तं कः श्रावयति ? (एकपदेन उत्तरम्) **(1)**

(ग) खड्गसिंहस्य सन्ततयः के सन्ति ? (पूर्णवाक्येन उत्तरम्) **(1)**

(घ) 'स्कन्धौ ग्रीवाञ्च पाटयित्वा तं धरायां न्यपातयत् ।' इत्यत्र क्रियापदं किम् अस्ति ? **(1)**

(ङ) 'निखिलां योजनां' इत्यत्र विशेषणपदं किम् अस्ति ? **(1)**

24. प्रदत्तशब्दानां प्रयोगं कुर्वन् एकम् अनुच्छेदं लिखत – **(5)**

विद्याधनं, व्यये कृते वर्धत एव, धर्मार्थकाममोक्षादीनां प्राप्तिः, कल्पलतेव, सर्वत्र पूज्यते, चोरयितुं न शक्नोति, पवित्रम्, परादेवता, सिद्ध्यति, विद्याविहीनः ।

**अथवा**

क्रमरहितानि वाक्यानि समुचितक्रमानुसारं लिखत –

(क) सेवकः वारं–वारं तां वारयितुं प्रायतत् किन्तु सा नापगता ।

(ख) मक्षिका तु नासिकायाः उड्डीय अन्यत्र गता ।

(ग) एकदा भोजनोपरान्ते धनिके सुप्ते सति सेवकः तं व्यजनम् अवीजयत् ।

(घ) एकस्मिन् नगरे एकः धनिकः वसति स्म ।

(ङ) तेन प्रहारेण धनिकस्य नासिका अवछिन्ना अभूत् ।

(च) अतः मूर्खाणां सङ्गतिः नितरां हेया ।

(छ) तस्य गृहे सेवायाम् अल्पबुद्धिः नाम एकः मूर्खसेवकः आसीत् ।

(ज) तस्मिन् एव काले एका मक्षिका वारं–वारं धनिकस्य नासिकायाम् उपाविशत् ।

(झ) अतः सः खड्गम् उत्थाप्य मक्षिकायां प्रहारम् अकरोत् ।

(ञ) सक्रोधं सः सेवकः तां मक्षिकां हन्तुं निश्चयम् अकरोत् ।

25. अधोलिखितवाक्येषु केषाञ्चित् पञ्चवाक्यानां संस्कृतभाषायाम् अनुवादं कुरुत – **($5 \times 1 = 5$)**

(क) सत्य ही जीतता है ।

(ख) मैं रामायण पढ़ता हूँ ।

(ग) माधव गेंद से खेलता है ।

(घ) स्वाध्याय से आलस्य मत करो ।

(ङ) हम सब कल गीत गायेंगे ।

(च) वह परसों उदयपुर गया ।

(छ) आपका कल्याण हो ।

(ज) बालक को दूध अच्छा लगता है ।

26. अधोलिखितपदयोः सूत्रोल्लेखपूर्वकं सन्धिविच्छेदं कुरुत – **(1 + 1 = 2)**

(क) मध्वरिः

(ख) श्रीशः

27. अधोलिखितपदयोः सूत्रोल्लेखपूर्वकं सन्धिं कुरुत – **(1 + 1 = 2)**

(क) विष्णो + ए

(ख) प्र + एजते

28. निम्नलिखितेषु रेखाङ्कितपदेषु प्रयुक्तविभक्तेः नाम उल्लिख्य विधायकसूत्रं लिखत – **(4 × 1 = 4)**

(क) पाचकः तण्डुलान् ओदनं पचति ।

(ख) पुत्रेण सह आगतः पिता ।

(ग) बालकः पुष्पाय स्पृहयति ।

(घ) बालकः सिंहात् बिभेति ।

29. अधोलिखितपदयोः प्रयुक्तसमासस्य नाम उल्लिख्य विग्रहं कुरुत – **(1 + 1 = 2)**

(क) निर्मक्षिकम्

(ख) घनश्यामः

30. अधोलिखितविग्रहवाक्ययोः समासं कृत्वा नामापि लिखत – **(1 + 1 = 2)**

(क) माता च पिता च ।

(ख) कण्ठे कालः यस्य सः ।